# १५. पादुका सहस्रम् - रत्न सामान्य पद्धतिः (५०)

उदर्चिषस्ते रङ्गेन्द्र पादावनि बहिर्मणीन् ।
अन्तर्मणिरवं श्रुत्वा मन्ये रोमाञ्चिता कृतीन् ॥ १५.१॥ ४८१॥

विधेहि शौरे र्मणिपादुके त्वं
विपद्यमाने मयि रश्मिजालैः ।
आसीदता मन्तक किङ्कराणां
वित्रासनान् वेत्रलता विशेषान् ॥ १५.२॥ ४८२॥

मुकुन्द पादावनि मध्यनाड्या
मूर्धन्यया निष्पततो मुमुक्षोः ।
आब्रह्मलोका दवलम्ब नार्थं
रत्नानि ते रश्मिगणं सृजन्ति ॥ १५.३॥ ४८३॥

असूर्यभेद्यां रजनीं प्रजानाम्
आलोक मात्रेण निवारयन्ती ।
अमोघ वृत्ति र्मणिपादरक्षे
मुरद्विषो मूर्तिमती दया त्वम् ॥ १५.४॥ ४८४॥

रङ्गेश पादावनि तावकानां
रत्नोपलानां द्युतयः स्फुरन्ति ।

श्रेयः फलानां श्रुति वल्लरीणाम्
उपघ्न शाखा इव निर्व्यपायाः ॥ १५.५॥ ४८५॥

कस्यापि पुंसः कनकापगायाः
पुण्ये सलीलं पुलिने शयालोः ।
समीपवृत्ति र्मणिपादुके त्वं
संवाहयन्तीव पदं करैः स्वैः ॥ १५.६॥ ४८६॥

दिदृक्षमाणस्य परं निधानं
स्नेहान्विते योगदशा विशेषे ।
संवित्प्रदीपं मणिपादरक्षे
सन्धुक्षयन्तीव मरीचयस्ते ॥ १५.७॥ ४८७॥

समाधिभाजां तनुते त्वदीया
रङ्गेश पादावनि रत्न पङ्क्तिः ।
स्थानं प्रयातुं तमसः परं तत्
प्रदीपकृत्यं प्रभया महत्या ॥ १५.८॥ ४८८॥

बध्नासि रङ्गेश्वर पादरक्षे
मन्ये यथार्हं मणि रश्मिजालैः ।
सेवानतानां त्रिदशेश्वराणां
शेषापटीं शेखर सन्निकृष्टाम् ॥ १५.९॥ ४८९॥

भजन्ति रङ्गेश्वर पादरक्षे
प्रकल्पयन्तो विविधान्पुमर्थान् ।
उदर्चिष श्चिन्तयतां जनानां
चिन्तामणित्वं मणयस्त्वदीयाः ॥ १५.१०॥ ४९०॥

नाथस्य दत्ते नदराज कन्या
पातुं शुभान्पाद नखेन्दु रश्मीन् ।
मणि प्रभाभिः प्रतिपन्न पक्षां
लीला चकोरी मिव पादुके त्वाम् ॥ १५.११॥ ४९१॥

जनस्य रङ्गेश्वर पादुके त्वं
जातानुकंपा जनयस्य यत्नात् ।
आकृष्य दूरान् मणिरश्मिजालैः
अनन्य लक्षाणि विलोचनानि ॥ १५.१२॥ ४९२॥

रङ्गेश पादावनि तावकीनैः
स्पृष्टाः कदाचिन् मणिरश्मि पाशैः ।
कालस्य घोरं न भजन्ति भूयः
कारागृहान्तेषु कशाभि घातम् ॥ १५.१३॥ ४९३॥

रत्नानि रङ्गेश्वर पादरक्षे

त्वदाश्रितान्य प्रतिघै र्मयूखैः ।
आसेदुषीणां श्रुति सुन्दरीणां
वितन्वते वर्ण निचोल लक्ष्मीम् ॥ १५.१४॥ ४९४॥

निद्रारस प्रणयिनो मणिपादरक्षे
रङ्गेश्वरस्य सविधं प्रतिपद्यमाना ।
शय्या फणीन्द्र मभितो भवती विधत्ते
रत्नांशुभि र्यवनिका मिव दर्शनीयाम् ॥ १५.१५॥ ४९५॥

सद्यस्त्वदुद्वह दशा नमिता कृतीनां
स्रस्तांशुकं निजरुचा मणिपादुके त्वम् ।
पद्मा सहाय परिवार विलासिनीनां
पट्टांशुकै रिव पयोधर मावृणोषि ॥ १५.१६॥ ४९६॥

देवस्य रङ्गवसतेः पुरतः प्रवृत्तैः
उद्धूत विश्व तिमिरां मणिरश्मिजालैः ।
मन्ये मदीय हृदयायतन प्रवेश-
माङ्गल्य दीप कणिकां मणिपादुके त्वाम् ॥ १५.१७॥ ४९७॥

आकीर्ण रत्न निकरां मणिपादुके त्वां
रङेश्वरस्य ललितां विपणिं प्रतीमः ।
यत्संश्रयेण भवति स्थिर भक्ति मूल्यं

कैवल्यमत्र जगतां क्रय विक्रयार्हम् ॥ १५.१८॥ ४९८॥

व्यङ्क्तुं क्षमं भगवतो जगदीश्वरत्वं
वज्राङ्कुश ध्वज सरोरुह चक्र चिह्नम् ।
आश्लिष्य निर्भर रुचिं मणिपादुके त्वां
आसीदनाभरण सुन्दर मङ्घ्रि पद्मम् ॥ १५.१९॥ ४९९॥

रत्नप्रभा पटल चक्र मनोहरा त्वं
पद्मारुणं पदमिदं त्वयि रङ्गभर्तुः ।
मन्ये तदेत दुभयं मणिपादरक्षे
चक्राब्ज मण्डल मकिञ्चन रक्षणार्थम् ॥ १५.२०॥ ५००॥

त्रासात्स्वयं प्रणमतां दनुजेश्वराणां
सङ्ख्येऽवलून शिरसा मपि मौलिरत्नैः ।
आयोजय त्यनुकलं मणिपादुके त्वां
सैरन्ध्रिकेव मुरवैरि कृपाणधारा ॥ १५.२१॥ ५०१॥

आस्कन्दनानि विबुधेन्द्र शिखामणीनां
त्वामाश्रिता न्यसुर सूदन पादरक्षे ।
रत्नानि ते स्तुति सुवर्ण परीक्षणार्थे
नूनं भजन्ति निकषोपलतां कवीनाम् ॥ १५.२२॥ ५०२॥

पादावनि प्रणयिनां प्रतिपादितार्थां
क्रीडा सरोज मिव शौरिपदं वहन्तीम् ।
प्रत्युप्त रत्न निकर प्रतिपन्न शोभां
पश्यामि रोहण गिरे रधिदेवतां त्वाम् ॥ १५.२३॥ ५०३॥

यामेव रत्न किरणै र्मणिपादरक्षे
चूडापदे तनुभृतां भवती विधत्ते ।
शक्रादि दैवत शिखामणि रज्यमानैः
त्वामेव ते प्रकटयन्ति पदै रभिख्याम् ॥ १५.२४॥ ५०४॥

रत्नाङ्कुरै रविरला मणिपादरक्षे
पाकोन्मुखैः परिगता पुरुषार्थ सस्यैः ।
देवेन रङ्गपतिना जगतां विभूत्यै
केदारिकेव कृपया परिकल्पिता त्वम् ॥ १५.२५॥ ५०५॥

निर्धूत मोह तिमिरास्तव रत्नदीपैः
निर्विश्यमान विभवं नदराज पुत्र्या ।
प्रत्यक्षयन्ति निगमान्त निगूढमर्थं
पादावनि त्वयि निवेशित भावबन्धाः ॥ १५.२६॥ ५०६॥

रत्नोपल प्रकर सम्भव एष दूरात्
रङ्गाधिराज चरणावनि तावकीनः ।

आर्द्रापराध परिखिन्न धियां प्रजानां
आश्वासनार्थ इव भाति करप्रसारः ॥ १५.२७॥ ५०७॥

व्यामुह्यतो विषयि बाल मृगान्मदीयान्
संसार घर्म जनितासु मरीचिकासु ।
पादावनि प्रगुण रत्न मयूख जालैः
आकृष्य विश्रमय केशव कान्ति सिन्धौ ॥ १५.२८॥ ५०८॥

अन्त र्निधाय मुनिभिः परिरक्षमाणाम्
आत्मीय रश्मि गुणितां मणिपादरक्षे ।
रङ्गेश पादकमल प्रतिपन्न मुद्रां
नीवीमवैमि भवतीं निगमान्त वाचाम् ॥ १५.२९॥ ५०९॥

रामस्य रङ्ग वसते श्चरणानुषङ्गात्
काष्ठां गतां भुवन पावनतां दधाना ।
पादावनि प्रचुर रत्न शिला निबद्धा
संसार सन्तरण सेतुरसि प्रजानाम् ॥ १५.३०॥ ५१०॥

दिविषन्मकुटेषु सञ्चरन्त्याः प्रचुरस्ते मणिपादुके प्रकाशः ।
दिवि रङ्गपते र्महोत्सवार्थं वितता वन्दन मालिकेव भाति ॥ १५.३१॥ ५११॥

प्रभवन्ति दवीयसां स्वभावात्

तव रत्नानि मुकुन्द पादरक्षे ।
अयसामिव हन्त लोहकान्ताः
कठिनानां मनसां विकर्षणाय ॥ १५.३२॥ ५१२॥

परिपश्यति देवि रङ्गनाथे रहसि त्वं सविधे निविश्य लक्ष्म्याः ।
परिपुष्यसि रत्नधामभिः स्वैः अनसूयेव मनोज्ञ मङ्गरागम् ॥ १५.३३॥ ५१३॥

तव रत्नकरार्पितं नवीनं परिगृह्य स्थिरमंशुकं मनोज्ञम् ।
जरदंशुकवत्सुखेन देहं कृतिनः केशव पादुके त्यजन्ति ॥ १५.३४॥ ५१४॥

अभितो मणिपादुके निबद्धैः
कृत संस्कार विशेष मात्मरत्नैः ।
कुरुते भवती पदं मुरारेः
कठिनेऽस्मिन् हृदि मे निवेश योग्यम् ॥ १५.३५॥ ५१५॥

निजरत्न कराञ्चलै र्मदीयान् अपराधा नवधूय दत्तसाम्या ।
रमया सहितस्य रङ्गभर्तुः पदयोरर्पय पादुके स्वयं माम् ॥ १५.३६॥ ५१६॥

रश्मिजाल परिवेष बन्धुरा रङ्गभूमिपति रत्नपादुके ।
विश्वलोचन विहङ्ग हारिणी वागुरेव वितता विराजसे ॥ १५.३७॥ ५१७॥

मानसाम्बुज विकास हेतुभिः सेविता मणिगणैः प्रभाकरैः ।

पादुके वहसि सद्भिराश्रितां देवि विष्णुपद सम्पदं नवाम् ॥ १५.३८॥ ५१८॥

अधिशयित फणिश्वरस्य शौरेः
स्वय मधिरूढ पदोपधान पार्श्वा ।
मणिवलय जुषा करेण मन्दं
स्पृशसि पदावनि पादयो र्युगं तत् ॥ १५.३९॥ ५१९॥

भवत्यन्ते त्वां प्रणतस्य जन्तोः
तदोकोऽग्र ज्वलनं त्वत्प्रकाशैः ।
यतो नाड्या मध्यमया विनिर्यन्
गतिं विन्देत् केशव पादरक्षे ॥ १५.४०॥ ५२०॥

अशिथिल परिणद्धा रश्मिजालै र्मणीनां
दुरधिगम तमं नः पार मारोपयन्ती ।
कमल नयन माद्यं कर्णधारं दधाना
भवसि भवपयोधेः पादुके पोतपात्री ॥ १५.४१॥ ५२१॥

मणिगण किरणैस्ते कल्पिते गुल्मभेदे
मृगयुरिव कुरङ्गीं त्वां पुरस्कृत्य भव्याम् ।
हरति चरणरक्षे भक्ति पाशावरुद्धं
हृदय हरिण यूथं प्राणिनां रङ्गनाथः ॥ १५.४२॥ ५२२॥

परिचित पदमूला पादुके रङ्गिणस्त्वं
प्रभवति भुजमध्ये कौस्तुभोऽयं तथाऽपि ।
भवति भृश मधस्तात् तेजसा भव्यभूम्ना
शलभित दुरितानां तावकानां मणीनाम् ॥ १५.४३॥ ५२३॥

कल्प श्रेणी दिन परिणतौ जन्तुजाले प्रसुप्ते
विष्वग्व्याप्ते जगति तमसा पादुके तादृशेन ।
स्त्याना लोकैस्तव मणिगणै र्वासगेह प्रदीपाः
सम्पद्यन्ते सह कमलया जागरूकस्य यूनः ॥ १५.४४॥ ५२४॥

श्रीरङ्गेन्दो श्चरण कमल द्वन्द्व सेवाव लेपात्
आरूढायां त्वयि मखभुजा मानतान् मौलि भागान् ।
तेषां चूडामणिभि रनघै स्तावकानां मणीनां
केशाकेशि प्रभवति मिथ स्त्रास लेशोज्झितानाम् ॥ १५.४५॥ ५२५॥

त्वद्रत्नोपल रश्मि पञ्जर तनुत्राणं स्थिरं बिभ्रतो
मात र्माधव पादुके न तु पुनर्हस्तैः स्पृशन्त्याकुलैः ।
दूरोत्सिक्त दुराढ्य जिह्मग बिलद्वाःपाल कोपानल-
ज्वालामित्र कठोर वेत्रलतिका दत्तार्धचन्द्रं वपुः ॥ १५.४६॥ ५२६॥

संवर्तोदित सूर्यकोटि सदृशीं रङ्गेश पादावनि
प्रस्तौषि प्रतियत्न रत्न निकर ज्योतिश्छटा मुद्भटाम् ।

तन्मन्ये त्वदनन्य सूरि परिषन्मध्ये निवेशाय नः
ताद्दग्वासरसेऽपि भेत्तु मचिरा दस्माक मन्धन्तमः॥ १५.४७॥ ५२७॥

सलीलं विन्यस्य त्वयि चरणरक्षे निजपदं
यदृच्छा निष्क्रान्ते विहरति हरौ रङ्गरसिके ।
दिशा सौधा नष्टौ जनयसि तदा निर्भरमिलन्
मणिच्छाया माया घन घटित केतु व्यतिकरान् ॥ १५.४८॥ ५२८॥

महार्घै राश्लिष्टां मणिभि रवधूत द्युमणिभिः
कथञ्चित् क्षेत्रज्ञै रधिगत पदामम्ब भवतीम् ।
मुकुन्देन त्रातुं पदकमल मूले विनिहितां
निराबाधां मन्ये निधिमनघ वाचां निरवधिम् ॥ १५.४९॥ ५२९॥

तापत्रयं निरुन्धे पचति कषायान् विशोषयति पङ्कम् ।
तेजस्त्रितय मिदं ते शङ्के रङ्गेन्द्र पादुके तेजः ॥ १५.५०॥ ५३०॥

इति कवितार्किक सिंहस्य सर्वतन्त्र स्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य
श्रीमद्वेदान्ताचार्यस्य कृतिषु श्रीरङ्गनाथ पादुकासहस्रे
रत्न सामान्य पद्धतिः पञ्चदशी ॥